# Vishnuna Parashuramaya Proktam Kavacham

# વિષ્ણુના પરશુરામાય પ્રોક્તં કવચમ્

## Document Information

Text title : Vishnuna Parashuramaya Proktam Kavacham

File name : viShNunAparashurAmAyaproktaMkavacham.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, kavacha

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 458/62-75||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# વિષ્ણુના પરશુરામાય પ્રોક્તં કવચમ્

વિષ્ણુઃ કવચમાદાય રામં પ્રતિ સમાયયૌ ॥ ૬૨॥

દદૌ સમન્ત્રં પરશુરામાય તચ્છૃણુ પ્રિયે ।
"ૐ શ્રીકમલવાસિન્યૈ સ્વાહા" મન્ત્રં દદૌ તતઃ ॥ ૬૩॥

પ્રજાપતિઃ ઋષિર્યસ્ય છન્દશ્ચ બૃહતી તથા ।
દેવી પદ્માલયા યસ્ય ચતુર્વર્ગે નિયોજનમ્ ॥ ૬૪॥

ૐ શ્રીકમલવાસિન્યૈ સ્વાહા મે પાતુ મસ્તકમ્ ।
ૐ શ્રી કપાલં મે પાતુ લોચને શ્રીંશ્રિયૈ નમઃ ॥ ૬૫॥

ઓ શ્રીંશ્રિયૈ સ્વાહેતિ વૈ કર્ણયુગ્મં સદાઽવતુ ।
ૐ શ્રીઙ્ક્લીં મહાલક્ષ્મ્યૈ સ્વાહા મે પાતુ નાસિકામ્ ॥ ૬૬॥

ૐ શ્રીં પદ્માલયાયૈ ચ સ્વાહા દન્તાન્ સદાઽવતુ ।
ઔશ્રીં કૃષ્ણપ્રિયાયૈ ચ દન્તરન્ધ્રાન્ સદાઽવતુ ॥ ૬૭॥

ૐ શ્રીનારાયણેશાયૈ મમ કણ્ઠં સદાઽવતુ ।
ૐ શ્રીં કેશવકાન્તાયૈ મમ સ્કન્ધં સદાઽવતુ ॥ ૬૮॥

ૐ શ્રીં પદ્મનિવાસિન્યૈ સ્વાહા નાભિં સદાઽવતુ ।
ૐ હ્રીં શ્રીં સંસારમાત્રે મમ વક્ષઃ સદાઽવતુ ॥ ૬૯॥

ૐ શ્રીમ્મોં કૃષ્ણકાન્તાયૈ સ્વાહા પૃષ્ઠં સદાઽવતુ ।
ૐ હ્રીંશ્રીં શ્રિયૈ સ્વાહા ચ મમ હસ્તૌ સદાઽવતુ ॥ ૭૦॥

ૐ શ્રીનિવાસકાન્તાયૈ મમ પાદૌ સદાઽવતુ ।
ૐ શ્રીંહ્રીઙ્ક્લીં શ્રિયૈ સ્વાહા સર્વાઙ્ગં મે સદાઽવતુ ॥ ૭૧॥

પ્રાચ્યાં પાતુ મહાલક્ષ્મીરાગ્નેય્યાં કમલાલયા ।
પદ્મા માં દક્ષિણે પાતુ નૈરૃત્યાં શ્રીહરિપ્રિયા ॥ ૭૨॥

પદ્માલયા પશ્ચિમે માં વાયવ્યાં પાતુ માં સ્વયમ્ ।

ઉત્તરે કમલા પાતુ ચૈશાન્યાં સિન્ધુકન્યકા ॥ ૭૩॥

નારાયણી ચ પાતૂર્ધ્વમધો વિષ્ણુપ્રિયાઽવતુ ।
સન્તતં સર્વતઃ પાતુ વિષ્ણુપ્રાણાધિકા મમ ॥ ૭૪॥

ઇતિ સર્વૈશ્વર્યપ્રદં વર્મ બાહૌ સુધારય ।
દેવેન્દ્રૈશ્ચાસુરેન્દ્રૈશ્ચાઽવધ્યો ભવસિ નિશ્ચિતમ્ ॥ ૭૫॥

ઇત્યુક્ત્વા કવચં દત્વા યયૌ વૈકુણ્ઠમચ્યુતઃ ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૪૫૮-અધ્યાયાન્તર્ગતં
વિષ્ણુના પરશુરામાય પ્રોક્તં કવચમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૪૫૮/૬૨-૭૫॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 458/62-75..

Proofread by PSA Easwaran

---

*Vishnuna Parashuramaya Proktam Kavacham*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*